| **मञ्जूषा** |
| **आनीयन्ते दिनेशेन, पाठः,।** |

**प्रश्न 8.**

**अधोलिखितदिनचर्यायां रिक्तस्थानानि कालबोधकशब्दैः पूर्यन्ताम्।**

**अधोलिखित दिनचर्या में रिक्त स्थानों की पूर्ति कालबोधक शब्दों से कीजिए।**

**1/2×4=2 Marks**

**(i) मम भ्राता प्रात: 5.00 भ्रमणार्थं गच्छति।**

**(ii) अहं प्रात: 8.30 कार्यालयं गच्छामि।**

**(iii) तव माता मध्या 2.00 विद्यालयात् आगच्छति।**

**(iv) मम जनकः सायं 7.30 गृहं प्राप्नोति।**

**उत्तर:**

(i) मम भ्राता प्रातः <u>पञ्चवादने</u> भ्रमणार्थं गच्छति।

(ii) अहं प्रातः <u>सार्धाष्टवादने</u> कार्यालयं गच्छति।

(iii) तव माता मध्या <u>द्विवादने</u> विद्यालयात् आगच्छति।

(iv) मम जनक: सायं <u>सार्धसप्तवादने</u> गृहं प्राप्नोति।

**प्रश्न 9.**

**अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषाप्रदत्तैः उचितैः अव्ययपदैः पूरयित्वा लिखत। (निम्नलिखित वाक्यों में रिक्त स्थानों की पूर्ति मजूषा में दिए गए अव्यय पदों के द्वारा कीजिए।)** **1 × 4 = 4 Marks**

**(i) किं त्वम् _ वाराणस गमिष्यसि।**

**(ii) प्रातः कालः संजातः, _ निद्रा न युज्यते ।**

**(iii) सः सर्वं वृत्तान्तं निवेद्य सकरुणम् _ अक्रन्दत् ।**

**(iv) अश्वाः प्राणत्राणाय _ अंधावन्।**

| |
|---|
| **मञ्जूषा** |
| **इतस्ततः, अपि, उच्चैः, सम्प्रति ।** |

**उत्तर :**

(i) अपि

(ii) सम्प्रति

(iii) उच्चैः

(iv) इतस्ततः

**प्रश्न 10.**

**अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। अशुद्धं पदं संशोध्य पुनः लिखत।**

**निम्नलिखित वाक्यों में रेखांकित पद अशुद्ध हैं। अशुद्ध पद को संशोधित कर पुनः लिखिए।** **1 × 4 = 4 Marks**

**(i) द्वे बालिके विद्यालयं गच्छति ।**

**(ii) किम् अहं सर्वे पुस्तकानि आदाय गच्छानि?**

**(iii) विजयः भ्रमणार्थं श्वः न गच्छति।**

**(iv) किं शकुन्तला अध्ययने रतः अस्ति?**

**उत्तरः**

(i) द्वे बालिके विद्यालयं गच्छतः।

(ii) किं अहम् सर्वाणि पुस्तकानि आदाय गच्छानि?

(iii) विजयः भ्रमणार्थ श्वः न गमिष्यति।

(iv) किं शकुन्तला अध्ययने रता अस्ति ?

## खण्डः घ

## पठित – अवबोधनम् (पठित-अवबोधन)

**प्रश्न 11.**

**अधोलिखित गद्यांश, पद्यं, नाटयांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। निम्नलिखित गद्यांश, पद्य और नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए।**

**(अ) गद्यांशः-**

**राजा उवाच – भगवन् ! भवन्मनोरथं पूरयित्वा आत्मानम् । अनुगृहीतं कर्तुम् इच्छामि। आदिश्यताम् – 'किं करवाणि ?' विप्रः उवाच – यदि भवान् प्रीतः तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि, येन मम लोकयात्रा निर्बाधा भवेत् । तत् श्रुत्वा राजा अचिन्तयत् – लोके चक्षुर्दानं दुष्करम् एव । नूनम् ईदृशं दानम् इच्छन् अयं याचकः केनापि प्रेरितः स्यात् । अथवा भवतु नाम। इति विचार्य राजा अभाषत – भो मित्र ! किमेकेन चक्षुषा । अहं भवते ' चक्षुर्द्वयमेव प्रयच्छामि।**

प्रश्नाः

**I. एकपदेन उत्तरत।**

**(एक शब्द में उत्तर दीजिए।)** **1 × 2 = 2 Marks**

**(i) लोक चक्षुर्दानं दुष्करमेव' इति कः अचिन्तयत् ?**

**(ii) राजा कम् अनुगृहीतं कर्तुम् इच्छति ?**

**II. पूर्णवाक्येन उत्तरत।**

**पूर्ण वाक्य में उत्तर दीजिए।** **2 × 1 = 2 Marks**

**'विप्रः राजानं किम् उक्तवान् ?**

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।**

**दिए गए विकल्पों में से चित उत्तर चुनकर लिखिए।** **4 × 4 = 2 Marks**

**(क) अनुच्छेदे 'लोकयात्रा' इत्यस्य किं विशेषणम् ?**

**(i) प्रीतः**

**(ii) निर्बाधा**

**(iii) चक्षुर्द्वयम्।**

**(ख) उवाच' इति क्रियापदस्य कर्तृपदं किम् ?**

**(i) विप्रः**

**(ii) याचकः**

**(iii) राजा।**

**(ग) 'तव' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?**

**(i) भवते**

**(ii) मम**

**(iii) विप्रः ।**

**(घ) “मम लोकयात्रा’ इत्यत्र ‘मम’ इति सर्वनामपदं कस्मै प्रयुक्तम् ?**

**(i) राज्ञे ।**

**(ii) विप्राये**

**(iii) लोकाय।।**

**उत्तर:**

I. (अ) राजा

(ब) आत्मानम्

II. “यदि भवान् प्रीतः तदा त्वत: एकस्य चक्षुषः दानम् इच्छामि, येन मम् लोकयात्रा निर्बाधा भवेत्।

III.

(क) (ii) निर्बाधा

(ख) (i) विप्रः या (iii) राजा

(ग) (ii) मम

(घ) (ii) विप्राय

**(आ) पद्यम्**

**चञ्चलं हि मनः कृष्ण ! प्रमाथि बलवद्दढम् ।**

**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ।**

**प्रश्नाः**

**I. एकपदेन उत्तरत।**

**एक शब्द में उत्तर दीजिए।** **1 × 2 = 2 Marks**

(i) कस्य निग्रहम् अर्जुनः सुदुष्करं कथयति ?

(ii) चञ्चलं किम अस्ति ?

II. पूर्णवाक्येन उत्तरत।

पूर्णवाक्य में उत्तर दीजिए। 2 × 1 = 2 Marks

मनः कीदृशम् भवति ?

III. प्रदत्तविकल्पेभ्यः चितम् उत्तरं चित्वा लिखत। दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए। 4 × 4 = 2 Marks

(क) श्लोके 'अतिकठिनम्' इत्यर्थे कि पर्यायपदं प्रयुक्तम् ?

(i) चञ्चलम्

(ii) प्रमाथि

(iii) सुदुष्करम्।

(ख) "मन्ये' इति क्रियापदस्य कर्तृपदं किम् ?

(i) कृष्णः

(ii) मनः

(iii) अहम्।

(ग) 'अहम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(i) श्रीकृष्णाय

(ii) अर्जुनाय

(iii) मनसे।

(घ) स्थिरम्' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(i) प्रमाथि

**(ii) दृढम्**

**(iii) चञ्चलम्**

**उत्तर:**

I. (i) मनसः

(ii) मनः

II.

पूर्ण वाक्य में उत्तर

मन: चञ्चलं भवति ।

III.

(क) (i) सुदुष्करम्

(ख) (ii) अहम् ।

(ग) (i) अर्जुनाय

(घ) (iii) चञ्चलम् ।

**(इ) नाट्यांशः**

**हिमांशुः – अहं चिन्तयामि यत् 'अरुणः' तु सूर्यस्य पर्यायः। अस्य प्रकाश: सर्वप्रथमम् इमं प्रदेशं स्पृशति । अतः अरुणस्य प्रदेशः अरुणाचलः।**

**पर्यटनाधिकारी – शोभनम् । उचितम् उक्तम् । हिमाद्रितुङ्गशृङ्ग सुशोभिता सूर्योदयभूमिः इयम् । अत: अरुणाचलः । अस्मिन् प्रदेशे पञ्चादशधिकाः नद्यः प्रवहन्ति । विपुला च अत्र वनसम्पदा । वनौषधीनां तु अयं स्रोत एव । पुष्पाणां समृद्धिः सुगन्धिः च मनोहरः । शुद्धपर्यावरणेन युक्तस्य अस्य प्रदेशस्य केवलं प्रकृतिः एव ने विविधा मनोहरा च प्रत्युत संस्कृतिः अपि ।**

**प्रश्नाः**

**I. एकपदेन उत्तरत।**

**एक शब्द में उत्तर दीजिए।** **1 × 2 = 2 Marks**

**(क) अस्मिन् प्रदेशे कति नद्यः प्रवहन्ति ?**

**(ख) कस्य प्रकाशः सर्वप्रथमम् इमं प्रदेशं स्पृशति ?**

**II. पूर्णवाक्येन उत्तरत।**

**पूर्ण वाक्य में उत्तर दीजिए।** **2 × 1 = 2 Marks**

**अयं प्रदेशः अरुणाचलः कुतः कथ्यते ?**

**III. प्रदत्तविकल्पेभ्यः चितम् उत्तरं चित्वा लिखत। दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए।** **4 × 4 = 2 Marks**

**(क) 'स्पृशति' इति क्रियापदस्य कर्तृपदं किम् ?**

**(i) हिमांशुः**

**(ii) पर्यटनाधिकारी**

**(iii) प्रकाशः।**

**(ख) 'हिमालय' इत्यर्थे किं पर्यायपदम् अत्र प्रयुक्तम् ?**

**(i) सूर्योदयभूमिः**

**(ii) हिमाद्रिः**

**(iii) स्रोतः।**

**(ग) 'दूषित' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?**

**(i) समृद्धि**

**(ii) मनोहरी**

**(iii) शुद्ध।**

**(घ) 'अयं स्रोत एव' इत्यत्र 'अयम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?**

**(i) सूर्योदयाय**

**(ii) वनौषधिभ्यः**

**(iii) अरुणाचलाय।**

उत्तरः

I.

(क) पञ्चादशधिकाः

(ख) सूर्यस्य

II. अरुणस्य प्रकाशः सर्वप्रथमम् इमं प्रदेशं स्पृशति । अतः अरुणस्य प्रदेशः अरुणाचलः।

III.

(1) (ii) प्रकाशः

(2) (ii) हिमान्द्रिः

(3) (i) शुद्ध

(4) (iii) अरुणाचलाय

**प्रश्न 12.**

**रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत। रेखाङ्कित पदों के आधार पर प्रश्न निर्माण कीजिए।** **1 × 4 = 4 Marks**

**(i) <u>शक्रस्य</u> प्रभावेण तस्य एकं चक्षुः प्रतिष्ठितम्।**

**(ii) बोधिसत्त्वः <u>शिबीना</u> राजा बभूव।**

**(iii) हा हन्त ! अवधीरिताः <u>अस्माभिः</u> गुरुजनोपदेशाः।**

**(iv) मौनं धृत्वा <u>मीनान्</u> क्रूरतया भक्षयसि**

**उत्तर:**

(i) कस्य प्रभावेण तस्य एकं चक्षुः प्रतिष्ठितम् ?

(ii) बोधिसत्वः केषां राजा बभूव ?

(iii) हा हन्त ! अवधीरिता: कैः गुरुजनोपदेशाः ?

(iv) मौनं धृत्वा कान् क्रूरतया भक्षयसि ?

**प्रश्न 12.**

**रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत।**

**(रेखाङ्कित पदों के आधार पर प्रश्न निर्माण कीजिए। )** **1 × 4 = 4 Marks**

**(i) <u>शक्रस्य</u> प्रभावेण तस्य एकं चक्षुः प्रतिष्ठितम्।**

**(ii) बोधिसत्त्वः <u>शिबीना</u> राजा बभूव।**

**(iii) हा हन्त ! अवधीरिताः <u>अस्माभिः</u> गुरुजनोपदेशाः।**

**(iv) मौनं धृत्वा <u>मीनान्</u> क्रूरतया भक्षयसि I**

**उत्तर:**

(i) कस्य प्रभावेण तस्य एकं चक्षुः प्रतिष्ठितम् ?

(ii) बोधिसत्वः केषां राजा बभूव ?

(iii) हा हन्त ! अवधीरिता: कैः गुरुजनोपदेशाः ?

(iv) मौनं धृत्वा कान् क्रूरतया भक्षयसि ?

**प्रश्न 13.**

**मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकद्वयस्य अन्वयं पूरयत।**

**मञ्जूषा में से समुचित पद चुनकर निम्नलिखित दोनों श्लोकों के अन्वय को पूर्ण कीजिए।**

**1/2 × 8 = 4 Marks**

**(i) शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात् ।**

**कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ।**

**अन्वयः – यः (i) ___ प्राक् (ii) ___ वेगम् इह एव (iii) _ __शक्नोति सः (iv) _ युक्तः सः सुखी (भवति)।**

**उत्तर :**

(i) शरीरविमोक्षणात् प्राक्

(ii) कामक्रोधोद्भवं वेगम् इह एव

(iii) सोढुम् शक्नोति सः

(iv) नरः युक्तः सः सुखी (भवति)।

**(ii) धनस्य निःसारलघोः स सारो यद् दीयते लोकहितोन्मुखेन ।**

**निधानतां याति हि दीयमानम्, अदीयमानं निधनैकनिष्ठम् ।**

**अन्वयः -निःसारलघोः (i) _ स सारः यत् (ii) _ दीयते। दीयमानं (धनं) (iii) _ याति (iv) _ (धनम्) निधनैकनिष्ठं भवति ।**

| |
|---|
| **मञ्जूषा**<br><br>**अदीयमानम्, नरः, लोकहितोन्मुखेन, सोढुम्, निधानताम्, \| शरीरविमोक्षणात्, धनस्य, कामक्रोधोद्भवम् ।** |

**उत्तर :**

(i) धनस्य स सारः यत्

(ii) लोकहितोन्मुखेन दीयते

(iii) निधानताम् याति

(iv) अदीयमानम्( धनम्) निधनैकनिष्ठे भवति।

**प्रश्न 14.**

**अधोलिखितकथनानां समुचितं भावं विकल्पेभ्यः चित्वा लिखत।**

**(निम्नलिखित कथनों का समुचित भाव विकल्पों में से चुनकर लिखिए।)**

**1 × 4 = 4 Marks**

**(क) स्वाध्यायाभ्यसनं चैव <u>वाङ्मयं</u> तप उच्यते।**

**(i) साहित्यम्**

**(ii) वाचिकम् ।**

**(iii) वाक्युक्तम्।**

**(ख) <u>शुश्रूषा</u> श्रवणं चैव ग्रहणं धारणं यथा।**

**(i) श्रोतुम् इच्छा**

**(ii) सेवा**

**(iii) श्वश्रूः।**

**(ग) समाः द्वादश <u>पर्जन्यः</u> तद् राष्ट्रं नाभिवर्षति।**

**(i) मेघः**

**(ii) परितः**

**(iii) पश्यतः।**

**(घ) तदा तस्य पुरतः देवराजः <u>शक्रः</u> उपस्थितः।**

**(i) शारदा**

**(ii) इन्द्र**

**(iii) शिल्पम्।**

**उत्तर :**

(क) (ii) वाचिकम्

(ख) (i) श्रोतुम् इच्छा

(ग) (i) मेघः

(घ) (ii) इन्द्रः

# CBSE Class 10

## Sanskrit

## Previous Year Question Paper 2016

**Series: JSR** **Set-4**

**Code no. 52**

## संस्कृतम्

(I) कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 16 हैं।

(II) प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें।

(III) कृपया जाँच कर लें कि इस प्रश्न-पत्र में 16 प्रश्न हैं।

(IV) कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें।

(V) इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा। 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका में कोई answerउत्तर नहीं लिखेंगे।

**अवधिः : होरात्रयम्** **पूर्णांकाः : 90**

**(ii) प्रतिखण्डम् उत्तराणि प्रदतायाम** |

खण्डः कःअपठितांशअवबोधनम्(अपठितांशअवबोधन) **15अड्काः**

खण्डः ख : रचनात्मककार्यम् (रचनात्मक-कार्य) **15अड्काः**

खण्डः ग : अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) **30अड्काः**

खण्डः घ : पठित-अवबोधनम् (पठित-अवबोधन) **30अड्काः**

**निर्देशाः :**

**(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति|**

**इस प्रश्न पत्र में चार खंड है|**

**(ii) प्रतिखंडम् उत्तराणि प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि ।**

**प्रत्येक खंड का उत्तर दी गई उत्तरपुस्तिका में ही लिखने है|**

**(iii) प्रत्येक खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।**

**प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे ।**

**(iv) प्रश्नपत्रे उत्तराणि न लेखनीयानि ।**

**प्रश्न-पत्र पर उत्तर न लिखें ।**

**(v) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।**

**प्रश्न-पत्र के अनुसार प्रश्न-संख्या अवश्य ही लिखनी होगी ।**

**(vi) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।**

**सभी प्रश्नों के उत्तर संस्कृत में लिखिए ।**

## खण्डः - क

## अपठितांश-अवबोधनम् (अपठितांश-अवबोधन)

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :**

**क्रोधः मनुष्यस्य महान् शत्रुः। क्रुद्धः जनः गुरून् अपि निन्दति, अपभाषणं करोति, ज्येष्ठानां हितवचनानि अपि न शृणोति। तस्माद् वयं क्रोधे सावधानाः भवेम। यदि क्रोधः आगच्छति तदा तस्मिन् एव क्षणे मौन धारणीयम्। मौनेन मनः शान्तं भवति। वाणी अपि नियन्त्रिता भवति। ईदृशे काले किञ्चित् पुस्तकं गृहीत्वा पठेम। कोपात् सर्वदा आत्मानं रक्षेम।**

**प्रश्नाः**

**(I) एकपदेन उत्तरत।**

**(i) क्रोधे आगते किं धारणीयम्?**

**उत्तरम्**- क्रोधे आगते मौनं धारणीयम्|

**(ii) क्रुद्धः जनः केषां हितवचनानि न शृणोति?**

**उत्तरम्-** क्रुद्धः जनः ज्येष्ठानां हितवचनानि अपि न शृणोति।

**(II) पूर्णवाक्येन उत्तरत ।**

**(i) मनुष्यस्य महान् शत्रुः कः?**

**उत्तरम्-** मनुष्यस्य महान् शत्रुः क्रोधः |

**(ii) मौनेन वाणी कीदृशी भवति?**

**उत्तरम्-** मौनेन वाणी नियन्त्रिता भवति।

**(III) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत :**

**(क) 'क्रुद्धः' इति कस्य पदस्य विशेषणम्?**

**(i) गुरोः**

**(ii) जनस्य**

**(iii) शत्रोः**

**(iv) ज्येष्ठस्य।**

**उत्तरम्-**(ii) जनस्य

**(ख) 'भवेम' इति क्रियापदस्य किं कर्तृपदं गद्यांशे प्रयुक्तम् ?**

**(i)जनः**

**(ii) वाणी**

**(iii) क्रोधः**

**(iv) वयम्।**

**उत्तरम्-**(iv) वयम्।

**(ग) 'सर्वस्मिन् काले' इत्यर्थे किम् अव्ययपदं गद्यांशे प्रयुक्तम्?**

**(i) सर्वदा**

**(ii) नियन्त्रिता**

**(iii) तस्मिन् एव**

**(iv) अपि।**

**उत्तरम्**-(i) सर्वदा

**(घ) 'असावधानाः' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?**

**(i) नियन्त्रिता**

**(ii) सर्वदा**

**(iii) सावधानाः**

**(iv) शान्तम्।**

**उत्तरम्**-(iii) सावधानाः

**(IV) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत :**

**उत्तरम्**- "क्रोधः"

**2.अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत।**

**प्राक्पादयोः पतति, खादति पृष्ठमांसं,**

**कणे कलं किमपि रौति शनैर्विचित्रम्।**

**छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः,**

**सर्व खलस्य चरितं मशकः करोति।।**

**प्रश्नाः**

**(I) एकपदेन उत्तरत।**

**पूर्वं पादयोः कः पतति?**

**उत्तरम्**- पूर्वं पादयोः मशकः पतति।

**(II) पूर्णवाक्येन उत्तरत।**

**(i) मशकः कर्णे किं करोति?**

**उत्तरम्**- मशकः कर्णे कलं करोति।

**(ii) मशकः कस्य सर्वं चरितं करोति?**

**उत्तरम्**- मशकः खलस्य सर्वं चरितं करोति।

**(III) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत :**

**(क) श्लोके 'दुष्टस्य' इति पदस्य किं पर्यायपदं प्रयुक्तम्?**

**(i) निरूप्य**

**(ii) खलस्य**

**(iii) चरितम्**

**(iv) विचित्रम्।**

**उत्तरम्**-(ii) खलस्य

**(ख) 'कटुकम्' इति पदस्य किं विलोमपदं श्लोके प्रयुक्तम्?**

**(i) छिद्रम्**

**(ii) मांसम्**

**(iii) कलम्**

**(iv) चरितम्।**

**उत्तरम्**-(iii) कलम्

## खण्डः ख

## रचनात्मककार्यम् (रचनात्मक कार्य)

**3. पितरं प्रति लिखितम् अधःपत्रं मञ्जूषाप्रदत्तशब्दैः पूरयित्वा पुनः लिखत :**

**ब्रह्मपुत्र-छात्रावासः,**

**(i)** नवदिल्लीतः

**तिथि:**

**पूज्याः (ii)** पितृमहोदयाः

**सादरं प्रणामाः।**

**अत्र कुशलं तत्रास्तु। इदं विज्ञाय भवान् अतिप्रसन्नः भविष्यति यद् गतदिवसे**

**अन्तर्विद्यालयीयभाषणप्रतिस्पर्धायां मया (iii)** प्रथमम् **स्थानं लब्धम्। क्रीडादिवसे (iv)** धावनप्रतियोगितायाम् **अहमेव प्रथमः आसम्। अस्मिन् वर्षे वार्षिकोत्सवे अहं नाट्याभिनयं (v)** करिष्यामि **अयं वार्षिकोत्सवः आगामि-शुक्रवासरे (vi)** आयोजयिष्यते। **विद्यालयस्य पक्षतः ह्य एव (vii)** निमन्त्रणपत्रम् **प्रेषितम्। अहमपि (viii)** भवन्तम् **सचयामि यद भवान् मात्रा सह अवश्यम् आगच्छतु। मम (ix)** उत्साहवर्धनम् **भविष्यति। मातृचरणयोः मम प्रणामाः ।**


**भवतः पुत्रः,**

**(x)** नीरजः

**मञ्जूषा**

| |
|---|
| **निमन्त्रणपत्रम्, धावनप्रतियोगितायाम्, नीरजः, उत्साहवर्धनम्, भवन्तम्, नवदिल्लीतः, प्रथमम्, करिष्यामि, पितृमहोदयाः, आयोजयिष्यते।** |

**4.अध:प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत :**



**मञ्जूषा**

| |
|---|
| **छात्राः, पादपानाम्, लक्षम्, कुर्वन्ति, शिक्षकैः, पर्यावरणम्, सम्भूय, क्षेत्रे, विशालम्, वृक्षारोपणम्, वनमहोत्सवः।** |

**उत्तरम्**-(i)इदं वनमहोत्सवस्य चित्रं अस्ति|

(ii)क्षेत्रे सर्वे छात्राः वृक्षारोपणं कुर्वन्ति|

(iii)क्षेत्र: अति विशालं अस्ति |

(iv)छात्रा: शिक्षकै: सह वृक्षारोपणं कुर्वन्ति |

(v)चित्रं मनोहरं अस्ति |

अथवा

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चसंस्कृतवाक्येषु एकम् अनुच्छेदं लिखत : भारतीय - कृषकः**

**मञ्जूषा**

| |
|---|
| **अन्नम्, वपति, वर्षाजलम्, बीजानि, कृषिक्षेत्रेषु, पशवः शोचनीयदशा, आधुनिकसाधनैः, धनाभावेन, परिश्रमम्।** |

**उत्तरम्**-(i)भारतीयकृषक: अस्माकं अन्देव: अस्ति |

(ii)ते कृषिक्षेत्रेषु कठिनं परिश्रमं कुर्वन्ति |

(iii)वर्तमाने ते आधुनिकसाधनै: कृषिं कुर्वन्ति |

(iv)धनाभावेन जीवनयापन अति कठिनं जात |

(v)कृषकस्य दशा वर्तमानसमये शोचनीय |

**खण्डः ग**

**अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण)**

**5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखतः**

**(i) वैकुण्ठे हरिः + शेते।**

**उत्तरम्**-हरिश्शेते

**(ii) आचारः परमो धर्मः इति + एतत् विदुषां वचः।**

**उत्तरम्-**इत्येतत्

**(iii) न कुर्यादहितं कर्म।**

**उत्तरम्-**कुर्यात्+अहितं

**(iv) गुरावागते छात्राः तूष्णीम् अभवन्।**

**उत्तरम्**-गुरौ+आगते

**6.अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत :**

**(क) प्रतिहतम् अन्तःकरणं यस्य सः प्रच्छन्नभाग्यः अचिन्तयत्।**

**(i) प्रतिहतम् अन्त:करणम्**

**(ii) प्रतिहतकरणम्**

**(iii) प्रतिहतान्तःकरणः।**

**उत्तरम्**-(iii) प्रतिहतान्तःकरणः।

**(ख) सः यथेच्छं फलानि खादति।**

**(i) इच्छाम् अनतिक्रम्य**

**(ii) इच्छया सहितम्**

**(iii) इच्छाभिः समम्।**

**उत्तरम्**-(i) इच्छाम् अनतिक्रम्य

**(ग) वने पशवः पक्षिणः च निवसन्ति ।**

**(i) पशुपक्षी**

**(ii) पशुपक्षिणः**

**(iii) पशवः पक्षिणः।**

**उत्तरम्**-(ii) पशुपक्षिणः

**(घ) वृक्षे सः वानरः उपनीडं गच्छति ।**

**(i) नीडे नीडे**

**(ii) नीडेन सह**

**(iii) नीडस्य समीपम्।**

**उत्तरम्**-(iii) नीडस्य समीपम्।

**(ङ) पीताम्बरः हरिः क्षीरसागरे शेते।**

**(i) पीतम् अम्बरं यस्य सः।**

**(ii) पीतम् अम्बरा यस्य**

**(iii) पीतानि अम्बराणि यस्याः सा।**

**उत्तरम्**-(i) पीतम् अम्बरं यस्य सः।

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत:**

**(क) मनसः चञ्चल + तल् कः निरोद्धं क्षमः?**

**(i) चञ्चलन्तम्**

**(ii) चञ्चलताम्**

**(iii) चञ्चलतायाः।**

**उत्तरम्**-(ii) चञ्चलताम्

**(ख) गच्छन्तं बालकं पश्य।**

**(i) गम् + शतृ**

**(ii) गच्छ् + आन्**

**(iii) गच्छ् + अन्तम्।**

**उत्तरम**-(i) गम् + शतृ

**(ग) गुरुं सेव् + शानच् छात्रः प्रसन्नः अस्ति।**

**(i) सेवमाना**

**(ii) सेवमानम्**

**(iii) सेवमानः।**

**उत्तरम्**-(iii) सेवमानः।

**(घ) परिश्रमस्य महत्त्वं सर्वे जानन्ति ।**

**(i) मह + त्वम्**

**(ii) महत् + वम्**

**(iii) महत् + त्व।**

**उत्तरम्**-(iii) महत् + त्व।

**(ङ) एषा मम पुत्र + ङीप् क्रीडति।**

**(i) पुत्रा**

**(ii) पुत्री**

**(iii) पुत्रीम्।**

उत्तरम्-**(ii) पुत्री**

**8. अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः पूरयित्वा लिखतः**

**(i) सः** कुतः **वाराणसीं गमिष्यति।**

**(ii) त्वम्** किमर्थम् **समागतोऽसि।**

**(iii) ग्रामात्** बहिः **एकं सुन्दरम् उद्यानम् अस्ति।**

**(iv)** यावत् **परोपकारः क्रियते तावत् शरीरस्य उपयोगः।**

**(v) ध्वनि** मा **कुरु**।

**मञ्जूषा**

| |
|---|
| **बहिः, मा, किमर्थम्, यावत्, कुतः।** |

**9. उचितसंख्यापदं चित्वा वाक्यानि पूरयत।**

**(i) मासे** त्रिंशत् **दिनानि भवन्ति । (त्रिंशत्, त्रिंशताः, त्रिसत्)**

**(ii)ताः** तिस्रः **स्त्रियः ग्रामं गच्छन्ति। (त्रयः, तिस्रः, त्रीणि)**

(iii) एकस्मिन्   **उद्याने विंशतिवृक्षाः आसन्। (एकस्याम्, एकस्मिन्, एकस्य)**

(iv) **तडागे** चत्वारि   **कमलानि विकसन्ति। (चतस्रः, चत्वारः, चत्वारि)**

(v) द्वे   **कोकिले कूजतः । (द्वे, द्वौ, द्वयोः)**

**10. अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा अशुद्धपदं संशोध्य लिखतः**

**(क) जनाः ह्यः आपणं गमिष्यन्ति ।**

**(i) गमिष्यावः**

**(ii) अगच्छन्**

**(iii) गच्छानि**

**(iv) अगच्छताम्।**

**उत्तरम्**-(ii) अगच्छन्

**(ख) सः बालिका क्रीडति ।**

**(i) बाला**

**(ii) बालकः**

**(iii) बालको**

**(iv) बालिके।**

**उत्तरम्**-(ii) बालकः

**(ग) त्वं कदा नाटकं द्रक्ष्यन्ति ?**

**(i) पश्यन्ति**

**(ii) पश्यावः**

**(iii) द्रक्ष्यसि**

**(iv) पश्यथ।**

**उत्तरम**-(iii) द्रक्ष्यसि

**(घ) त्वम् मम मित्रः असि।**

**(i) मित्रम्**

**(ii) मित्रौ**

**(iii) मित्रा**

**(iv) मित्राः।**

**उत्तरम्**-(i) मित्रम्

**(ङ) अहं नेत्रयोः पश्यामि।**

**(i) नेत्रेभ्यः**

**(ii) नेत्रैः**

**(iii) नेत्रेषु**

**(iv) नेत्राभ्याम्।**

**उत्तरम्**-(iv) नेत्राभ्याम्।

**(च) पाठ्यपुस्तके द्वादश पाठानि सन्ति ।**

**(i) पाठे**

**(ii) पाठेषु**

**(iii) पाठाः**

**(iv) पाठान्।**

**उत्तरम्**-(iii) पाठाः

## खण्डः घ

## पठित-अवबोधनम् (पठित-अवबोधन)

**11. अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखतः**

**(अ) गद्यांशः**

**"परशुरामकुण्डं तु लोहितनद्याः किञ्चिद् दूरे अस्ति। पूर्वम् इदं ब्रह्मकुण्डम् आसीत्। इदं लोहितनद्याः उद्गमस्थलम् इति मन्यते। अत्र अनेकानि अन्यानि दर्शनीयानि स्थलानि अपि सन्ति। अस्माकं पर्यटनविभागेन प्रकाशितां केषाञ्चित् प्रसिद्ध-स्थलानां सूची पठित्वा ज्ञायताम् इमानि पर्यटनस्थलानि। एतेषां दर्शनाय सम्पूर्णा व्यवस्था वर्तते। कार्यक्रमस्तु सुनिश्चितः।"**

**प्रश्नाः**

**(I) एकपदेन उत्तरत।**

**परशुरामकुण्डं कस्याः उद्गमस्थलं मन्यते ?**

**उत्तरम्-** परशुरामकुण्डं लोहितनद्याः  उद्गमस्थलं मन्यते |

**(II).पूर्णवाक्येन उत्तरत।**

**केषां दर्शनाय सम्पूर्णा व्यवस्था वर्तते?**

**उत्तरम-**पर्यटनस्थ्लानां दर्शनाय सम्पूर्णा व्यवस्था वर्तते |

**(III) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखतः**

**(क) 'व्यवस्था' इति कर्तृपदस्य किं क्रियापदं गद्यांशे प्रयुक्तम्?**

**(i) आसीत्**

**(ii) वर्तते**

**(iii) मन्यते**

**(iv) अस्ति ।**

**उत्तरम्-**(ii) वर्तते

**(ख) 'एतेषाम्' इति सर्वनामपदं केभ्यः प्रयुक्तम् ?**

**(i) कार्यक्रमेभ्यः**

**(ii) कुण्डेभ्यः**

**(iii) पर्यटनस्थलेभ्यः**

**(iv) उद्गमस्थलेभ्यः।**

**उत्तरम्-**(iii) पर्यटनस्थलेभ्यः

**(आ) पद्यम् :**

**"पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।**

**पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता।।"**

**प्रश्नाः**

**(I).एकपदेन उत्तरत।**

**पिता कदा पुत्राय विद्याधनं यच्छति?**

**उत्तरम्**-पिता बाल्ये पुत्राय विद्याधनं यच्छति |

**(II) पूर्णवाक्येन उत्तरत।**

**किं धनं महत् अस्ति ?**

**उत्तरम्**-विद्या धनं महत् अस्ति |

**(III) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखतः**

**(क) 'अस्य' इति सर्वनामपदं श्लोके कस्मै प्रयुक्तम्?**

**(i) पित्रे**

**(ii) तपसे**

**(iii) पुत्राय**

**(iv) बाल्याय।**

**उत्तरम्**-(iii) पुत्राय

**(ख) 'महत्' इतिपदं कस्य पदस्य विशेषणम्?**

**(i) पिता**

**(ii) विद्याधनम्**

**(iii) पुत्राय**

**(iv) तपः।**

**उत्तरम्**-(ii) विद्याधनम्

**(इ) नाट्यांशः**

**काकः रे परभृत! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः ? अतः अहमेव करुणापरः।**

**राजहंसः शान्तं पापम्। अहमेव नीरक्षीरविवेकी पक्षिणां राजा।**

**बकः धिक् युष्मान्, अहमेव सर्वशिरोमणिः । (ततः प्रविशति प्रकृतिमाता)**

**प्रकृतिः (सस्नेहम्) अलम् अलम् मिथः कलहेन। अहं प्रकृतिः एव युष्माकं जननी। यूयं सर्वे मम प्रियाः। सर्वेषामेव महत्त्वं विद्यते यथासमयम। सर्वैः एव मे शोभा। न तावत कलहेन समयं वृथा यापयेत।"**

**प्रश्नाः**

**(I) एकपदेन उत्तरत।**

**पिकस्य सन्ततिं कः पालयति?**

**उत्तरम्-**पिकस्य संतति काक: पालयति |

**(II) पूर्णवाक्येन उत्तरत।**

**सर्वैः एव कस्याः शोभा वर्तते?**

**उत्तरम-** सर्वैः एव प्रकृतिमातु: शोभा वर्तते |

**(III) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखतः**

**(क) 'करुणापरः' इति कस्य विशेषणम्?**

**(i) बकस्य**

**(ii) काकस्य**

**(iii) राजहंसस्य**

**(iv) पिकस्य।**

**उत्तरम्-**(ii) काकस्य

**(ख) नाट्यांशे 'परस्परम्' इति पदस्य समानार्थकं किम् अव्ययपदं प्रयुक्तम् ?**

**(i) अलम्**

**(ii) तर्हि**

**(iii) मिथः**

**(iv) एव ।**

**उत्तरम्**-(iii) मिथः

**12. अधोलिखितकथनानां समुचितं भावं विकल्पेभ्यः चित्वा लिखत :**

**(क) 'सर्वथा जागरूकोऽहं छात्राणां कृते आदर्शः एव।'**

**(i) काकः छात्र इव जागरूकः भवेत्।**

**(ii) काकः सदैव जागरूकः भवति। तस्य इयं जागरूकता छात्राणां कृते आदर्शः एव।**

**(iii) काकः सदैव छात्राणां कृते जागरणं करोति।**

**उत्तरम्**-(ii) काकः सदैव जागरूकः भवति। तस्य इयं जागरूकता छात्राणां कृते आदर्शः एव।

**(ख) 'नीरक्षीरविवेके तु हंसो हंसः बको बकः।'**

**(i) हंसः क्षीरं पिबति, बकः क्षीरं पिबति ।**

**(ii) हंसस्य बकस्य च वर्णः श्वेतः भवति।**

**(iii) दुग्धस्य जलस्य च मध्ये किं दुग्धम् किं च जलम् ? इति विवेकपूर्णे कार्ये एव हंसस्य बकस्य च भेदः दृश्यते।**

**उत्तरम्**-(iii) दुग्धस्य जलस्य च मध्ये किं दुग्धम् किं च जलम् ? इति विवेकपूर्णे कार्ये एव हंसस्य बकस्य च भेदः दृश्यते।

**13. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकद्वयस्य अन्वयं पूरयत :**

**(क) "जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।**

**स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च।।"**

**अन्वयः**

**जलबिन्दुनिपातेन क्रमशः (i)** घटः **पूर्यते।**

**सर्वविद्यानां (ii)**धर्मस्य **च धनस्य च सः एव हेतुः।**

**(ख) "अस्त्रं ब्रह्मशिरो यत्र परमास्त्रेण बध्यते।**

**समाः द्वादशपर्जन्यस्तद् राष्ट्र नाभिवर्षति ।।"**

**अन्वयः**

**यत्र (i)** ब्रह्मशिरः **अस्त्रं परमास्त्रेण बध्यते।**

**(ii)** पर्जन्यः **द्वादशसमाः तद् राष्ट्रं न अभिवर्षति ।**

**मञ्जूषा**

| **ब्रह्मशिरः, धर्मस्य, पर्जन्यः, घटः।।** |
|---|

**14. रेखाङ्कित पदानि आधृत्य प्रश्ननिर्माणं कुरुत।**

**(i) मन्त्री सभायाम् अकातरः भवेत्।**

**उत्तरम्-**कः सभायाम् अकातरः भवेत् ?

**(ii) मम पिच्छानाम् अपूर्वं सौन्दर्यम्।**

**उत्तरम्-** मम केषां अपूर्वं सौन्दर्यम् ?

**(iii) ब्रह्मणः आयुः शतं वर्षाणि।**

**उत्तरम्-** ब्रह्मणः आयुः कति वर्षाणि ?

**(iv) द्रौणिना द्रौपद्याः पुत्राः हताः।**

**उत्तरम्-** केन द्रौपद्याः पुत्राः हताः ?

**(v) प्रच्छन्नभाग्यस्य गृहम् मणीनाम् आभया भासमानम् अभवत्।**

**उत्तरम्-**प्रच्छन्नभाग्यस्य किम् मणीनाम् आभया भासमानम् अभवत् ?

**15. अधोलिखितवाक्यानि घटनाक्रमानुसारेण लिखत :**

**(i) कर्मपुरनाम्नि नगरे प्रच्छन्नभाग्यनामकः कश्चित् कुमारः आसीत्।**

**(ii) मार्गः बहुभिः गर्तैः परिपूर्णः आसीत्।**

**(iii) एकः उद्दण्डः बालकः अवदत्-भवन्तौ किमर्थं सुपथं परित्यज्य कुपथेन गन्तुं प्रवृत्तौ ?**

**(iv) प्रच्छन्नभाग्यः बाल्यकाले विद्यां न प्राप्नोत् ।**

**(v) तौ धनहरणार्थं ग्रामान्तरं प्रस्थितौ ।**

**(vi) तौ मिलित्वा चौरकार्यं कुरुतः स्म।**

**(vii) प्रच्छन्नभाग्यः दुष्टबुद्धेः संगत्या चौरः अभवत् ।**

**(viii) तौ मार्गे क्रीडतः बालकान् दृष्ट्वा अवदताम् - भोः किमर्थं विषमे मार्गे क्रीडथ?**

**उत्तरम्-**1. (i) कर्मपुरनाम्नि नगरे प्रच्छन्नभाग्यनामकः कश्चित् कुमारः आसीत्।

2. (iv) प्रच्छन्नभाग्यः बाल्यकाले विद्यां न प्राप्नोत् ।

3. (vii) प्रच्छन्नभाग्यः दुष्टबुद्धेः संगत्या चौरः अभवत् ।

4. (vi) तौ मिलित्वा चौरकार्यं कुरुतः स्म।

5. (v) तौ धनहरणार्थं ग्रामान्तरं प्रस्थितौ ।

6. (ii) मार्गः बहुभिः गर्तैः परिपूर्णः आसीत्।

7. (viii) तौ मार्गे क्रीडतः बालकान् दृष्ट्वा अवदताम् - भोः किमर्थं विषमे मार्गे क्रीडथ?

8. (iii) एकः उद्दण्डः बालकः अवदत्-भवन्तौ किमर्थं सुपथं परित्यज्य कुपथेन गन्तुं प्रवृत्तौ ?

**16. रेखाङ्कितपदानां प्रसङ्गानुसारम् अर्थं चित्वा लिखत।**

**(क) 'साधु पृष्टम्! अत्र अनेके प्रमुखोत्सवाः।'**

**(i) श्रेष्ठः जनः**

**(ii) उचितम्**

**(iii) सज्जनः।**

**उत्तरम्-**(ii) उचितम्

**(ख) 'यस्त्रिषष्टिशतारस्य अर्थं वेद स परः कविः।'**

**(i) वेदग्रन्थः**

**(ii) ज्ञानम्**

**(iii) ज्ञातवान्।**

**उत्तरम्**-(iii) ज्ञातवान्।

**(ग) 'कम्पते सकला मही।'**

**(i) महीपालः**

**(ii) पृथिवी**

**(iii) महीरुहः।**

**उत्तरम्-(ii)** पृथिवी

# CBSE Class 10

## Sanskrit

## Previous Year Question Paper 2015

**Series: RLH** **Set-4**

**Code no. 52**

## संस्कृतम्

(I) कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 20 हैं।

(II) प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें।

(III) कृपया जाँच कर लें कि इस प्रश्न-पत्र में 18 प्रश्न हैं।

(IV) कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें।

(V) इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा। 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका में कोई answerउत्तर नहीं लिखेंगे।

**अवधिः : होरात्रयम्** **पूर्णांकाः : 90**

**(ii) प्रतिखण्डम् उत्तराणि प्रदतायाम** |

खण्डः कःअपठितांशअवबोधनम्(अपठितांशअवबोधन) **15अङ्काः**

खण्डः ख : रचनात्मककार्यम् (रचनात्मक-कार्य) **15अङ्काः**

खण्डः ग : अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) **30अङ्काः**

खण्डः घ : पठित-अवबोधनम् (पठित-अवबोधन) **30अङ्काः**

**निर्देशाः :**

**(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति|**

**इस प्रश्न पत्र में चार खंड है|**

**(ii) प्रतिखंडम् उत्तराणि प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि ।**

**प्रत्येक खंड का उत्तर दी गई उत्तरपुस्तिका में ही लिखने है|**

**(iii) प्रत्येक खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।**

**प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे ।**

**(iv) प्रश्नपत्रे उत्तराणि न लेखनीयानि ।**

**प्रश्न-पत्र पर उत्तर न लिखें ।**

**(v) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।**

**प्रश्न-पत्र के अनुसार प्रश्न-संख्या अवश्य ही लिखनी होगी ।**

**(vi) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।**

**सभी प्रश्नों के उत्तर संस्कृत में लिखिए ।**

## खण्डः - क

## अपठितांश-अवबोधनम् (अपठितांश-अवबोधन)

**1.अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :**

**एकदा बालः सिद्धार्थः प्रातः भ्रमणाय उपवनम् अगच्छत् । उपवने पक्षिणः मधुरं कूजन्ति स्म । तेषां कलरवं श्रुत्वा सिद्धार्थः प्रसन्नः अभवत् । किञ्चित् कालानन्तरं तस्य भ्राता देवदत्तः अपि आखेटनाय तत्र आगच्छत् । सः बाणेन आकाशे एकं हंसम् अविध्यत् । बाणेन विद्धः हंसः भूमौ अपतत् । सिद्धार्थः करुणया तं हसं कुटीरम् आनीय हंसस्य परिचर्याम् अकरोत् । सिद्धार्थस्य देवदत्तस्य च मध्ये विवादः भवति यत् हंसः कस्य ? अन्ते नृपः निर्णयम् अकरोत् यत् हंसः सिद्धार्थस्य एव । सत्यमेव कथ्यते – "रक्षकः भक्षकात् श्रेष्ठः" इति ।**

**प्रश्नाः**

**I.एकपदेन उत्तरत ।**

**(i) हंसः कस्य ? इति निर्णय कः अकरोत्?**

**उत्तरम्-** हंसः कस्य ? इति निर्णय नृपः अकरोत्।

**(ii) उपवने के मधुरं कूजन्ति स्म ?**

**उत्तरम्-** उपवने पक्षिणः मधुरं कूजन्ति स्म।

**II.पूर्णवाक्येन उत्तरत ।**

**(i) सिद्धार्थः भ्रमणाय उपवनं कदा अगच्छत् ?**

**उत्तरम्-** सिद्धार्थः भ्रमणाय उपवनं प्रातः अगच्छत्।

**(ii) हंसः कुत्र अपतत् ?**

**उत्तरम्-** हंसः भूमौ अपतत् ।

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत :**

**(क) गद्यांशे 'अकरोत् क्रियापदस्य कर्तृपदम् किम् अस्ति ?**

**(i) हंसः**

**(ii) सिद्धार्थः**

**(iii) देवदत्तः**

**(iv) भक्षकः**

**उत्तरम्-**(ii) सिद्धार्थः

**(ख) 'किञ्चित् कालानन्तरं तस्य भ्राता ............' इति वाक्ये तस्य' सर्वनामपदं कस्मै प्रयुक्तम् ?**

**(i) नृपाय**

**(ii) कुटीराय**

**(iii) हंसाय**

**(iv) सिद्धार्थाय**

**उत्तरम्-**(iv) सिद्धार्थाय

**(ग) गद्यांशे नृपः' इति कर्तृपदस्य किं क्रियापदं प्रयुक्तम् ?**

**(i) अकरोत्**

**(ii) अविध्यत्**

**(iii) अभवत्**

**(iv) अगच्छत्**

**उत्तरम्-**(i) अकरोत्

**(घ) अनुच्छेदे सेवाम्' इति अर्थे किं पदं प्रयुक्तम् ?**

**(i) परिचर्याम्**

**(ii) निर्णयम्**

**(iii) सत्यम्**

**(iv) मधुरम्**

**उत्तरम्-**(i) परिचर्याम्

**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत।**

**उत्तरम्-** समुचितं शीर्षकं -"रक्षकः भक्षकात् श्रेष्ठः"

**2.अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :**

**'नमन्ति फलिनो वृक्षाः, नमन्ति गुणिनो जनाः ।**
**शुष्कवृक्षाश्च मूर्खाश्च, न नमन्ति कदाचन ।।'**

**प्रश्नाः**

**I. एकपदेन उत्तरत ।**

**कीदृशाः जनाः नमन्ति ?**

**उत्तरम्-** गुणिनः जनाः नमन्ति।

**II. पूर्णवाक्येन उत्तरत ।**

**(i) कीदृशाः वृक्षाः नमन्ति ?**

**उत्तरम्-**फलिनः वृक्षाः नमन्ति।

**(ii) शुष्कवृक्षाः कदा न नमन्ति ?**

**उत्तरम्-** शुष्कवृक्षाः कदाचन न नमन्ति |

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत :**

**(क) 'श्लोके बुद्धिहीनाः' इत्यस्य किं पर्यायपदं प्रयुक्तम् ?**

**(i) जनाः**

**(ii) कदाचन**

**(iii) मूर्खाः**

**(iv) शुष्काः**

**उत्तरम्-**(iii) मूर्खाः

**(ख) 'श्लोके 'गुणिनः' इति विशेषणपदस्य किं विशेष्यपदं प्रयुक्तम् ?**

**(i) फलिनः**

**(ii) वृक्षाः**

**(iii) शुष्काः**

**(iv) जनाः**

**उत्तरम्-**(iv) जनाः

## खण्ड:-ख

## रचनात्मककार्यम् (रचनात्मक कार्य)

**3. 'मित्र' प्रतिलिखितम् अधः पत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः लिखत :**

**(i)** केरलतः

**(ii)** प्रियमित्र । **गौरव!**

**सस्नेहं (iii)** नमस्काराः

**गतमासे अहं (iv)** पित्रा **मात्रा च सह भ्रमणार्थं मेघालयप्रदेशम् अगच्छम् । (v)** मेघालयप्रदेशस्य **सौन्दर्यम् अद्भुतम् । (vi)** इदं **सुन्दरं पर्वतीयस्थलम् । (vii)** विशालैः **वृक्षैः पर्वतैः च सुसज्जिता इयं वस्तुतः देवभूमिः एव अस्ति । इमं सुरम्यं प्रदेशं दृष्ट्वा**

**(viii)** <u>अनुभूयते</u> **यत् पर्वताः सदैव रम्याः एव। अहं त्वया सह अपि एकवार (ix)**<u>पुन:</u> **तत्र गन्तुम् इच्छामि । आशासे आवां शीघ्रमेव तत्र पर्वतानां मध्ये भविष्यावः ।**

**सर्वेभ्यः मम नमस्काराः कथनीयाः । शीघ्रं मिलावः ।**

**(x)** <u>भवतः</u> **मित्रम्,**

**अङ्कुरः ।**

**मञ्जूषा**

| |
|---|
| **भवतः, इदं, केरलतः, विशालैः, नमस्काराः, पुनः, अनुभूयते, मेघालयप्रदेशस्य, पित्रा, प्रियमित्र ।** |

**4. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत :**



**मञ्जूषा**

| |
|---|
| **उपवनम्, बालिकाः, वृक्षाः, पादपाः, प्रसन्नाः, पञ्च, अस्ति, सन्ति, क्रीडन्ति, कन्दुकेन, शोभन्ते, पर्वताः, पक्षिणः, आकाशे, पश्यन्ति, भ्रमन्ति, परिवेशः, सुन्दरः ।** |

**उत्तरम्**- (i)इदं उपवनस्य चित्रं अस्ति|

(ii)चित्रे पञ्च बालिका: कन्दुकेंन सह क्रीडन्ति|

(iii)उपवने अनेका: वृक्षा: सन्ति|

(iv)पक्षिणः  आकाशे भ्रमन्ति |

(v)इदं मनोहरं दृश्यं अस्ति|

अथवा

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत।**

**"प्रातःकालीनभ्रमणम्"**

**मञ्जूषा**

| |
|---|
| **सूर्योदयः, मार्गेषु, उपवनेषु, जनाः, बालाः, पक्षिणः, पशवः, प्रसन्नाः, भ्रमन्ति, कूजन्ति, \| क्रीडन्ति, विद्यालय, सन्ति, गच्छन्ति, यत्र-तत्र, सर्वत्र, विहरन्ति, कालः, मनोहरः, अस्ति ।** |

**उत्तरम्**-(i)प्रात:काल भ्रमणस्य परिदृश्य अति मनोहर: अस्ति |

(ii)बालका: विद्यालयं गच्छन्ति |

(iii)बाला: उपवनेषु क्रीडन्ति |

(iv)पक्षिण: कूजन्ति |

(v)जना: उपवनेषु भ्रमन्ति |

## खण्ड:-ग

## अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण)

**5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत।**

**(i) मम विद्यालयस्य <u>भो + अनं</u> दृष्ट्वा सर्वे प्रसन्नाः भवन्ति ।**

**उत्तरम्**-भवनं

**(ii) <u>प्रत्येक</u> मनुष्यः सुयोग्यः अस्ति ।**

**उत्तरम्**-प्रति+एकं

**(iii) <u>सत् + जनः</u> सदैव अनुकरणीयः ।**

**उत्तरम्**-सज्जन:

**(iv) <u>शुष्कवृक्षाश्च</u> मूर्खाश्च न नमन्ति कदाचन ।**

**उत्तरम्-**शुष्कवृक्षाः+च

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रह वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।**

**(क) न गर्वो न दैन्यं न च <u>क्रोधलोभौ</u> ।**

**(i) क्रोधस्य लोभस्य च**

**(ii) क्रोधः च लोभः च**

**(iii) क्रोधौ च लोभौ च**

**(iv) क्रोधाय लोभः**

**उत्तरम्-**(ii) क्रोधः च लोभः च

**(ख) <u>सिद्धः अर्थः यस्य सः</u> विहाराय वनम् अगच्छत् ।**

**(i) सिद्धार्थस्य**

**(ii) सिद्धार्थः**

**(iii) सिद्धार्थौ**

**(iv) सिद्धार्थाः**

**उत्तरम्-**(ii) सिद्धार्थः

**(ग) तस्मिन् उद्याने <u>बहुफलः</u> वृक्षः अस्ति ।**

**(i) बहूनि फलानि यस्मिन् सः**

**(ii) बहूनि च फलानि च**

**(iii) बहूनि फलानि**

**(iv) बहूनि फलानि येषु ते ।**

**उत्तरम्-** (i) बहूनि फलानि यस्मिन् सः

**(घ) ये परिश्रमं कुर्वन्ति ते <u>निर्विघ्नं</u> जीवन्ति ।**

**(i) विघ्नः सहितम्**

**(ii) विघ्नानां पश्चात्**

**(iii) विघ्नानाम् अभावः**

**(iv) विघ्नम् अनतिक्रम्य**

**उत्तरम्-**(iii) विघ्नानाम् अभावः

**(ङ) शिशवः <u>सचित्रं</u> पुस्तकं द्रष्टुम् इच्छन्ति ।**

**(i) चित्रं च सचित्रं च**

**(ii) चित्रस्य अभावः**

**(iii) चित्रस्य समीपे**

**(iv) चित्रेण सहितम्**

**उत्तरम्-**(iv) चित्रेण सहितम्

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम उत्तरं विकल्पेभ्यः चित्वा लिखत।**

**(क) <u>चल् + शतृ</u> बालकः सर्वत्र पश्यति ।**

**(i) चलन्**

**(ii) चलन्तम्**

**(iii) चलतः**

**उत्तरम्-**(i) चलन्

**(ख) <u>मुद् + शानच्</u> बालिकायै पारितोषिकं यच्छ ।**

**(i) मोदमाना**

**(ii) मोदमानायै**

**(iii) मोदमानायाः**

**उत्तरम्-**(ii) मोदमानायै

**(ग) उपवनस्य रमणीयता मनोहरा अस्ति ।**

**(i) रमणीय + त्व**

**(ii) रमणीय + तल्**

**(iii) रमणीय + टाप् ।**

**उत्तरम्-**(ii) रमणीय + तल्

**(घ) सत्यभाषणस्य महत् + त्व कः न जानाति ?**

**(i) महत्व**

**(ii) महताम्**

**(iii) महत्त्वम्**

**उत्तरम्-**(iii) महत्त्वम्

**(ङ) प्रातःकालस्य मनोहारिन् + ङीप् शोभा कस्मै न रोचते ?**

**(i) मनोहारी**

**(ii) मनोहारि**

**(iii) मनोहारिणी**

**उत्तरम्-**(iii) मनोहारिणी

**8.अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः पूरयित्वा लिखत :**

**(i) सः** कदा **गन्तुम् इच्छति ?**

**(ii) अत्र** मा **लिख ।**

**(iii) ताः** ह्यः **क्रीडां द्रष्टुम् अगच्छन् ।**

**(iv) सर्वे** श्वः **एक लेखं लेखिष्यन्ति ।**

**(v)सा कथयति** यत् **अहं गन्तुं न इच्छामि ।**

**मञ्जूषा**

| श्वः, यत्, ह्यः, मा, कदा। |
|---|

**9.उचितसङ्ख्यापदं चित्वा वाक्यानि पूरयत ।**

**(i) वृक्षे** <u>एकम्</u> **मधुरं फलम् अस्ति । (एकः, एका, एकम्)**

**(ii) पुस्तके** <u>चत्वारि</u> **चित्राणि सन्ति । (चत्वारि, चतुर्भिः, चत्वारः)**

**(iii** <u>एकस्याः</u> **बालिकायाः पिता आगच्छति । (एकस्य, एकस्याः, एकस्मिन्)**

**(iv)** <u>द्वे</u> **कोकिले प्रतिदिनं कूजतः । (द्वौ, द्वयोः, द्वे)**

**(v)** <u>त्रयः</u> **गायकाः गायन्ति । (त्रयः, तिस्रः, त्रीणि)**

**10.अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति । प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा अशुद्धपदं संशोध्य लिखत :**

**(क) ते <u>बालिकाः</u> कुत्र गमिष्यन्ति ?**

**(i) बालिके**

**(ii) बाले**

**(iii) बालकाः**

**(iv) बालकौ**

**उत्तरम्-**(iii) बालकाः

**(ख) यूयं व्यर्थं न <u>वदावः</u> ।**

**(i) वदथ**

**(ii) वदथः**

**(iii) वदन्ति**

**(iv) वदामः**

**उत्तरम्-**(i) वदथ

**(ग) किं त्वं श्वः <u>गच्छसि</u> ?**

**(i) गमिष्यति**

**(ii) अगच्छः**

**(iii) गमिष्यसि**

**(iv) गच्छ**

**उत्तरम्-**(iii) गमिष्यसि

**(घ) द्वे छात्रे अत्र <u>पठन्ति</u> ।**

**(i) पठति**

**(ii) पठतः**

**(iii) पठथः**

**(iv) पठथ**

**उत्तरं-**(ii) पठतः

**(ङ) अहं ह्यः <u>गच्छामि</u> ।**

**(i) अगच्छम्**

**(ii) गमिष्यामि**

**(iii) गच्छानि**

**(iv) गच्छेयम् ।**

**उत्तरम्-**(i) अगच्छम्

**(च) <u>आवाम्</u> अस्माकं मित्रैः सह गमिष्यतः ।**

**(i) युवाम्**

**(ii) यूयम्**

**(iii) त्वम्**

**(iv) तौ**

**उत्तरम्-**(iv) तौ

## खण्डः-घ

## पठित-अवबोधनम् (पठित-अवबोधन)

**11. अधोलिखितम् गद्यांशं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :**

**गद्यांशः**

**"अनेन वचसा प्रतिहतान्तःकरणः प्रच्छन्नभाग्यः अचिन्तयत् – 'किम् इदं वचनं माम् एव लक्ष्यीकरोति ? अहो ! कुमार्गम् आश्रितस्य मम कीदृशी इयं क्लेशपरम्परा । गुरूपदेशेन इव अनेन बालवचसा मम चक्षुषी समुन्मीलिते । अद्यप्रभृति पापपथं त्यजामि' इति विचिन्त्य मित्रं दुष्टबुद्धिम् अवदत् - 'सखे ! यदि मां मित्रस्थाने परिगणयसि, तर्हि साधुजनगर्हितम् इमं पन्थानं त्यजतु भवान् ।'**

**दुष्टबुद्धिः तु तस्य सद्वचनानि तिरस्कृत्य ग्रामाभिमुखं प्राचलत् । प्रच्छन्नभाग्यः तु समुपजातविवेकः स्वगृहं प्रतिनिवृत्तः ।"**

**प्रश्नाः**

**I.एकपदेन उत्तरत ।**

**'अद्यप्रभृति पापपथं त्यजामि ।' इति कः अचिन्तयत् ?**

**उत्तरम्-**'अद्यप्रभृति पापपथं त्यजामि ।' इति प्रच्छन्नभाग्यः अचिन्तयत्|

**II. पूर्णवाक्येन उत्तरत ।**

**सद्वचनानि तिरस्कृत्य दुष्टबुद्धिः कुत्र अगच्छत्?**

**उत्तरम्-** सद्वचनानि तिरस्कृत्य दुष्टबुद्धिः ग्रामाभिमुखं अगच्छत्|

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत ।**

**(क) चक्षुषी' इति कर्तृपदस्य क्रियापदं किम् अस्ति ?**

**(i) लक्ष्यीकरोति**

**(ii) अचिन्तयत्**

**(iii) समुन्मीलिते**

**(iv) अवदत्**

**उत्तरम्-**(iii) समुन्मीलिते

**(ख) अनुच्छेदे पन्थानम्' इति विशेष्यपदस्य विशेषणपदम् अस्ति**

**(i) ग्रामाभिमुखम्**

**(ii) पापपथम्**

**(iii) स्वगृहम्**

**(iv) साधुजनगर्हितम् ।**

**उत्तरम्-**(iv) साधुजनगर्हितम्

**12.अधोलिखितम् पद्यं पठित्वा प्रदत्तप्रश्नान संस्कृतेन उत्तरत :**

**श्लोकः**

**"य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च ।**

**न कुर्यादहितं कर्म स परेभ्यः कदापि च ।।"**

**प्रश्नाः**

**I. एकपदेन उत्तरत ।**

**मनुष्यः कस्य श्रेयः इच्छति ?**

**उत्तरम्-** मनुष्यः आत्मनः श्रेयः इच्छति |

**II. पूर्णवाक्येन उत्तरत ।**

**मनुष्यः किं किम् इच्छति ?**

**उत्तरम्-** मनुष्यः आत्मनः श्रेयः प्रभूतानि सुखानि च इच्छति |

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत ।**

**(क) 'कुर्यात्' इति क्रियापदस्य कर्तृपदम् अस्ति ।**

**(i) कर्म**

**(ii) यः**

**(iii) सः**

**(iv) आत्मनः**

**उत्तरम्-**(iii) सः

**(ख) कल्याणम्' इति भावे अत्र किं पदं प्रयुक्तम् ?**

**(i) श्रेयः**

**(ii) प्रभूतानि**

**(iii) सुखानि**

**(iv) अहितम्**

**उत्तरम्-**(i) श्रेयः

**13. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :**

**<u>नाट्यांशः</u>**

**"कोकिलः - रे मयूर ! अलम् अतिविकत्थनेन । मधुमासे आम्रवृक्षे स्थित्वा यदा अहं पञ्चमस्वरेण गायामि तदा श्रोतारः कथयन्ति -**

**काकः कृष्णः पिकः कृष्णः, को भेदः पिक-काकयोः ।**

**वसन्तसमये प्राप्ते, काकः काकः पिकः पिकः ।।**

**काकः -रे परभृत ! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः ? अतः अहम् एव करुणापरः पक्षिसम्राट् काकः !**

**राजहंसः -शान्तं शान्तम् ! अहमेव नीरक्षीरविवेकी पक्षिणां राजा !**

**बकः -धिक् युष्मान् । अहमेव सर्वशिरोमणिः !"**

**प्रश्नाः**

**I.एकपदेन उत्तरत ।**

**कोकिलः मधुमासे कुत्र स्थित्वा गायति ?**

**उत्तरम्-** कोकिलः मधुमासे आम्रवृक्षे स्थित्वा गायति |

**II. पूर्णवाक्येन उत्तरत ।**

**राजहंसः किं कथयति ?**

**उत्तरम्- राजहंसः कथयति यत् शान्तं शान्तम् ! अहमेव नीरक्षीरविवेकी पक्षिणां राजा !**

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत :**

**(क) कथयन्ति इति क्रियापदस्य कर्तृपदं किम् अस्ति ?**

**(i) कोकिलः**

**(ii) काकः**

**(iii) श्रोतारः**

**(iv) बकः**

**उत्तरम्-**(iii) श्रोतारः

**(ख) 'अहम् एव करुणापरः पक्षिसम्राट् इति वाक्ये 'अहं' पदं कस्मै प्रयुक्तम् ?**

**(i) कोकिलाय**

**(ii) राजहंसाय**

**(iii) बकाय**

**(iv) काकाय**

**उत्तरम्-**(iv) काकाय

**14. अधोलिखितकथनानां समुचितं भावं विकल्पेभ्यः चित्वा लिखत :**

**(क) 'विश्वस्य आत्माऽहम् ।"**

**(i) कालः परिवर्तनशीलः ।**

**(ii) कालः एव जगतः निर्माता ।**

**(iii) कालः एव जगतः आत्मा ।**

**उत्तरम्-**(iii) कालः एव जगतः आत्मा ।

**(ख) नीरक्षीरविवेके तु हंसो हंसः बको बकः ।'**

**(i) हंसस्य बकस्य च मध्ये भेदः नास्ति ।**

**(ii) दुग्धस्य जलस्य च मध्ये भेदं कर्तुं हंसः बकः च समर्थौ ।**

**(iii) 'दुग्धस्य जलस्य च मध्ये किं दुग्धं किञ्च जलम्' इति सन्दर्भे हंस-बकयोः भेदः दृश्यते ।**

**उत्तरम्-**(iii) 'दुग्धस्य जलस्य च मध्ये किं दुग्धं किञ्च जलम्' इति सन्दर्भे हंस-बकयोः भेदः दृश्यते ।

**15. मञ्जूषातः समुचितं पदं चित्वा अधोलिखितश्लोकद्वयस्य अन्वयं पूरयत :**

**I.“विद्वांसः एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः ।**
**अन्येषां वदने ये तु ते चक्षुर्नामनी मते ।।"**

**<u>अन्वयः</u>**

**(i)** <u>अस्मिन्</u> **लोके विद्वांसः एव चक्षुष्मन्तः प्रकीर्तिताः ।**

**(ii)** <u>अन्येषां</u> **वदने ये (चक्षुषी) ते तु चक्षुर्नामनी मते ।**

**II.“प्रार्थितं ते मया चक्रं देवदानवपूजितम् ।**
**अजेयः स्यामिति विभो ! सत्यमेतद् ब्रवीमि ते ।।"**

**<u>अन्वयः</u>**

**विभो ! अजेयः स्याम् इति मया देवदानव-पूजितम्**
**चक्रम् ते (iii)** <u>प्रार्थितं</u> **। एतत् ते सत्यम् (iv)** <u>ब्रवीमि</u> ।

**मञ्जूषा**

| |
|---|
| **प्रार्थितम्, अस्मिन्, ब्रवीमि, अन्येषाम् ।** |

**16. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत ।**

**(i) कश्चन विद्वान् <u>सङ्कल्पवाचनं</u> करोति ।**

**उत्तरम्-** कश्चन विद्वान् किम् करोति ?

**(ii) <u>लोहितजनपदे</u> अनेकबौद्धविहाराः सन्ति ।**

**उत्तरम्-** कस्मिन् अनेकबौद्धविहाराः सन्ति ?

**(iii) सहस्रांशुः न भासते ।**

**उत्तरम्-**कः न भासते ?

**(iv) सर्वेषाम् एव महत्त्वं विद्यते ।**

**उत्तरम्-**केषां एव महत्त्वं विद्यते ?

**(v) विचित्रः स्वप्नः मया दृष्टः ।**

**उत्तरम्-** विचित्रः स्वप्नः कया दृष्टः ?

**17.अधोलिखितवाक्यानि घटनाक्रमानुसारेण लिखत :**

**(i) मित्रद्वयं कुपथेन धनं प्राप्तुं विदेशं गच्छति ।**

**(ii) सुबुद्धिः प्रच्छन्नभाग्यः कृषिकार्यं कृत्वा श्रमपूर्वकं धनम् अर्जयति ।**

**(iii) दैववशात् सर्पः दुष्टबुद्धिं दशति ।**

**(iv) इदं श्रुत्वा दुष्टबुद्धिः शीघ्रम् एव तत् क्षेत्रं गच्छति ।**

**(v) सः अश्वत्थमूलं खनित्वा सुवर्णकलशं प्राप्नोति ।**

**(vi) इदं ज्ञात्वा दुष्टबुद्धिः चौर्यार्थं तस्य गृहम् अगच्छत् ।**

**(vii) मार्गे कस्यापि बालकस्य प्रश्नेन समुपजातविवेकः प्रच्छन्नभाग्यः गृहं प्रति गच्छति ।**

**(viii) तत्र सः प्रच्छन्नभाग्यस्य स्वप्नस्य विषये वार्तां शृणोति यत् तस्य क्षेत्रे एकः सुवर्ण-पूरित-कलशः विद्यते ।**

**उत्तरम्-**1. (i) मित्रद्वयं कुपथेन धनं प्राप्तुं विदेशं गच्छति ।

2. (vii) मार्गे कस्यापि बालकस्य प्रश्नेन समुपजातविवेकः प्रच्छन्नभाग्यः गृहं प्रति गच्छति ।

3. (ii) सुबुद्धिः प्रच्छन्नभाग्यः कृषिकार्यं कृत्वा श्रमपूर्वकं धनम् अर्जयति ।

4. (vi) इदं ज्ञात्वा दुष्टबुद्धिः चौर्यार्थं तस्य गृहम् अगच्छत् ।

5. (viii) तत्र सः प्रच्छन्नभाग्यस्य स्वप्नस्य विषये वार्तां शृणोति यत् तस्य क्षेत्रे एकः

सुवर्ण पूरित-कलशः विद्यते ।

6.(iv) इदं श्रुत्वा दुष्टबुद्धिः शीघ्रम् एव तत् क्षेत्रं गच्छति ।

7.(v) सः अश्वत्थमूलं खनित्वा सुवर्णकलशं प्राप्नोति ।

8. (iii) दैववशात् सर्पः दुष्टबुद्धिं दशति ।

**18. रेखाङ्कितपदानां प्रसङ्गानुसारम् अर्थं चित्वा लिखत ।**

**(क) <u>कालस्य</u> कलनस्य आधारः सूर्यः मन्यते ।'**

**(i) कोलाहलस्य**

**(ii) गणनायाः**

**(iii)जगतः ।**

**उत्तरम्-**(ii) गणनायाः

**(ख)<u>साधु</u> पृष्टम् ! अत्र अनेके प्रमुखोत्सवाः ।'**

**(i) समुचितम्**

**(ii) श्रेष्ठः**

**(iii) सज्जनः ।**

**उत्तरम्-**(i) समुचितम्

**(ग)वत्स ! न जानाति भवान् द्रौणेः चपलां <u>प्रकृतिम्</u> ।'**

**(i) शब्दमूलम्**

**(ii) स्वभावम्**

**(iii) विशिष्टरचनाम् ।**

**उत्तरम्-**(ii) स्वभावम्

**CBSE Class 10**

**Sanskrit**

**Previous Year Question Paper 2014**

**Series: HRS** **Code no. 52**

**1. कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 20 हैं।**

**2. प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।**

**3. कृपया जाँच कर लें कि इस प्रश्न-पत्र में 16 प्रश्न हैं।**

**4. कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें**

**5. इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे**

**सड़लनात्मकं मूल्याङ्नम् - II**

**संस्कृतम् (सम्रेषणाधारितम्)**

**अवधि: : होरात्रयम्** **पूर्णांकाः : 90**

**निर्धारित समय : 3** **घण्टे अधिकतम अंक : 90**

**(ii) प्रतिखण्डम् उत्तराणि प्रद्तायाम**

खण्ड: क : अपठितांश-अवबोधनम् (अपठितांश-अवबोधन) **15 अड्काः**

खण्ड: ख : रचनात्मककार्यम् (रचनात्मक-कार्य) **15 अड्काः**

खण्ड: ग : अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) **30 अड्काः**

खण्ड: घ : पठित-अवबोधनम् (पठित-अवबोधन) **30 अड्का:**

**निर्देशा: :**

**(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः**

**इस प्रश्न-पत्र में चार**

**उत्तरपुस्तिकायां लेखनीयानि ।**

**प्रत्येक खण्ड के उत्तर दी गई उत्तर-पुस्तिका में ही लिखने हैं।**

**(iii) प्रत्येक खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।**

**प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे ।**

**(iv) प्रश्नपत्रे उत्तराणि न लेखनीयानि ।**

**प्रश्न-पत्र पर उत्तर न लिखें ।**

**(v) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।**

**प्रश्न-पत्र के अनुसार प्रश्न-संख्या अवश्य ही लिखनी होगी ।**

**(vi) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।**

**सभी प्रश्नों के उत्तर संस्कृत में लिखिए ।**

## खण्ड: क

## अपठितांश-अवबोधनम् (अपठितांश-अवबोधन)

**1. अधोलिखितम् अनुच्छेदम् पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत**:

भारतीया संस्कृति: संस्कृतम् आश्रित्य तिष्ठति । भारतस्य आत्मा संस्कृत्या

प्रकाशते । संस्कृतस्य पुनरुज्जीवनं तदा भविष्यति यदा जनजीवनस्य प्रत्येक क्षेत्रे अस्य प्रयोगो भवेत् । संस्कृतभाषा यदा भारतस्य व्यवहारभाषा आसीत् तदा भारतं 'विश्वगुरुः' इति ख्यातिम् अलभत । विदेशेभ्यः छात्राः अत्र अध्ययनाय आगच्छन्ति स्म नालन्दा-तक्षशिलादि-विश्वविद्यालयेषु विविधानि शास्त्राणि तेभ्यः पाठ्यन्ते स्म । पुनः विश्वगुरुत्वं प्राप्तुं भारतेन संस्कृतस्य अवलम्बनं करणीयमेव ।

**I. एक पदेन उत्तरत**

(i) भारतस्य आत्मा कया प्रकाशते?

उतर- संस्कृत्या ।

(ii) छात्राः अत्र अध्य्यनाय कुतःआगच्छन्ति स्म?

उतर –विदेशेभ्यः।

**II. पूर्णवाक्येन उत्तरत।**

(i)पुनः विश्वगुरुत्वम् प्राप्तुम् भारतेन किं करणीयम्?

उतर- विश्वगुरुत्वम् प्राप्तुम् भारतेन संस्कृतस्य अवलम्बनम् करणियमेव।

(ii)संस्कृतस्य पुनरुज्जीवनम् कदा भविष्यति ?

उतर- संस्कृतस्य पुनरुज्जीवनम् यदा जनजीवनस्य प्रत्येकम् क्षेत्रे अस्य प्रयोगो भवेत ।

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखतः**

**(1) गद्यांशे 'तेभ्यः' इति सर्वनामपदं केभ्यः प्रयुक्तम् ?**

**उतर-** विश्वविद्यालयेभ्यः

**(ख) "तिष्ठति' इति क्रियापदस्य किं कर्तृपदं गद्यांशे प्रयुक्तम् ?**

**उत्तर-** संस्कृतम्

**(2) प्रसिद्धिम्' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?**

**उत्तर**- अवलम्बनम्

**(3) 'भारतम्' इति पदस्य किं क्रियापदम् अनुच्छेदे प्रयुक्तम्?**

**उतर**- प्रकाशते

**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत ।**

**उत्तर-** अस्य अनुच्छेदस्य उचितम शीर्षक: ‘भारतस्यसंस्कृति’ अस्ति।

**1. अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :**

**“वृत्तं यत्नेन संरक्षेत् वित्तमायाति याति च ।**

**अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ।।"**

**प्रश्नाः**

**I. एकपदेन उत्तरत ।**

**यत्नेन किं संरक्षेत् ?**

उत्तर- वृतंरक्षेत

**II. पूर्णवाक्येन उत्तरत ।**

**(i) वित्ततः क्षीणः जनः कः कथ्यते ?**

उत्तर- वित्ततक्षीणजनःवृतम्कथ्यते।

**(ii) किम् आयाति याति च ?**

